# Kalisantarana Upanishat

# કલિસન્તરણોપનિષત્

## Document Information

Text title : kalisantaraNopaniShat

File name : kalisantarana_upan.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Anshuman Pandey

Proofread by : Anshuman Pandey, Vijay Pai

Latest update : August 22, 1996, February 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2022

*sanskritdocuments.org*

# કલિસન્તરણોપનિષત્

(કૃષ્ણયજુર્વેદીયા)

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ ।
સહ વીર્યઙ્કુરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

(ભગવન્નામસ્મરણમાત્રેણ કલિસન્તરણમ્)

હરિઃ ૐ । દ્વાપરાન્તે નારદો બ્રહ્માણં જગામ કથં ભગવન્ ગાં
પર્યટન્ કલિં સન્તરેયમિતિ ।
સ હોવાચ બ્રહ્મા સાધુ પૃષ્ટોઽસ્મિ સર્વશ્રુતિરહસ્યં ગોપ્યં
તચ્છૃણુ યેન કલિસંસારં તરિષ્યસિ ।
ભગવત આદિપુરુષસ્ય નારાયણસ્ય નામોચ્ચારણમાત્રેણ
નિર્ધૂતકલિર્ભવતીતિ ॥ ૧॥

(પરબ્રહ્માવરણવિનાશકષોડશનામાનિ)

નારદઃ પુનઃ પપ્રચ્છ તન્નામ કિમિતિ । સ હોવાચ હિરણ્યગર્ભઃ ।

હરે રામ હરે રામ રામ રામ હરે હરે ।

હરે કૃષ્ણ હરે કૃષ્ણ કૃષ્ણ કૃષ્ણ હરે હરે ॥

ઇતિ ષોડશકં નામ્નાં કલિકલ્મષનાશનમ્ ।

નાતઃ પરતરોપાયઃ સર્વવેદેષુ દૃશ્યતે ॥

ષોડશકલાવૃતસ્ય જીવસ્યાવરણવિનાશનમ્ ।
તતઃ પ્રકાશતે પરં બ્રહ્મ મેઘાપાયે રવિરશ્મિમણ્ડલીવેતિ ॥ ૨॥

(નામજપમહિમા)

પુનર્નારદઃ પપ્રચ્છ ભગવન્ કોઽસ્ય વિધિરિતિ ।
તં હોવાચ નાસ્ય વિધિરિતિ ।
સર્વદા શુચિરશુચિર્વા પઠન્ બ્રાહ્મણઃ સલોકતાં સમીપતાં
સરૂપતાં સાયુજ્યમેતિ ।
યદાસ્ય ષોડશકસ્ય સાર્ધત્રિકોટીર્જપતિ તદા બ્રહ્મહત્યાં તરતિ ।
તરતિ વીરહત્યામ્ ।
સ્વર્ણસ્તેયાત્ પૂતો ભવતિ ।
વૃષલીગમનાત્ પૂતો ભવતિ ।
પિતૃદેવમનુષ્યાણામપકારાત્ પૂતો ભવતિ ।
સર્વધર્મપરિત્યાગપાપાત્ સદ્યઃ શુચિતામાપ્નુયાત્ ।
સદ્યો મુચ્યતે સદ્યો મુચ્યતે ઇત્યુપનિષત્ ॥ ૩॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ ।
સહ વીર્યઙ્કુરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

Encoded and proofread by Anshuman Pandey
Proofread by Vijay Pai

*Kalisantarana Upanishat*
pdf was typeset on December 28, 2022

Please send corrections to *sanskrit@cheerful.com*